Postal Regd.No. GAMC- 1553/2022-2024 **ISSN 2454-6313**

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १९ अङ्क : २१८
जून - २०२४

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### उष्णः शान्तरसः

ग्रीष्मकालस्य अपरं साहित्यिकं नाम वर्तते-निदाघः । निदाघस्य वर्णनं वेदेषु दृश्यते ? अहं न जानामि । परन्तु हरीन्द्रनाथः चट्टोपाध्यायः Feast of Youth काव्यसङ्ग्रहे लिखति यत् निदाघस्य मध्याह्नकालः कश्चित् हिंसकः कुक्कुरः अस्ति । सः आकाशे धावति । जिह्वां मुखात् बहिः लम्बयति । ततः ज्वाला निःसरति । सः कुक्कुरः कस्य ? सूर्यस्य वा यमस्य वा ? यमः कुक्कुरान् गृहीत्वा नित्यम् अटति । सः यमः सूर्यात् एव तान् कुक्कुरान् लब्धवान् इति शङ्के।

कालिदासः ऋतुसंहारे लिखति यत् निदाघस्य औष्ण्यम् असहमानः मूषकः सर्पस्य फणायां छायाम् अन्विष्यति । प्रसङ्गवशात् दुर्वाससः भ्रातुः विश्वामित्रस्य कथा अपि स्मरणपथम् आयाति । सः हरिश्चन्द्रं परीक्षितुं भानुं प्रसभं तापितवान्। तथापि हरिश्चन्द्रस्य सत्यं म्लानं नैव अभवत्। न च रोहितः विचलितः जातः।

ग्रीष्मकालीनः प्रचण्डः तापः मुनीनाम् अपि धैर्यं परीक्षितुं शक्नोति । तथापि मह्यं तापः रोचते । तापस्य वर्णः कः स्यात् ? कोऽपि स्यात्, सः मह्यं रोचते । केषुचित् वस्तुषु अस्माकं ताटस्थ्यं शिथिलं भवति । तेन कारणेन तेषां सौन्दर्यं प्रति अस्माकं ध्यानं न भवति । तडागेषु प्रसृतं शैवालं वयं पश्यामः । तत्रत्यं जलं पेयं न भवति इति सत्यम्, किन्तु शैवालस्य शोभा स्वल्पा नास्ति । स्वार्थबुद्धिः मनुष्यः सर्वत्र उपयोगिताम् एव पश्यति । ततः सः सौन्दर्यस्य मर्म पारयितुं न शक्नोति ।

भाषाशास्त्रिणः किमपि वदेयुः, गुर्जरभाषायाः अनुबन्धेन तु 'आतपः पतति' इत्येव प्रयोगः शोभते । एतादृशः पतन् आतपः आकाशस्य शोभां वर्धयति । महिषी दोहनकाले नेत्रे निमील्य निष्कम्पं तिष्ठति । तथैव गगनदेवता अपि निस्तब्धा सती आतपस्य धाराः मुञ्चति । तदानीम् अभ्रं न दृश्यते । न च चन्द्रस्य दर्शनं भवति । क्वचित् चन्द्रः दृश्यते चेदपि सः दरिद्रचारुदत्तः इव आकाशस्य एकदेशे तिष्ठति । अस्मिन् काले खलु एकः एव रसः सर्वत्र प्रसरति । सः कः ? वीरः रौद्रः वा ? सः शान्तरसः इति मन्ये । शान्तरसः शीतलः एव भवति इति केन उक्तम् ? सः उष्णः अपि भवति ।

ग्रीष्मकालीने मध्याह्ने आतपस्य शासनं भृशं तपति, तथापि तत्र पवनस्य प्रतिष्ठा, भक्तस्य अव्यभिचारिणी भक्तिः इव, अक्षुण्णा एव तिष्ठति । आतपे अपि आनन्दयात्रा कथं कर्तव्या इति पवनः सम्यक् जानाति । सः सर्वत्र स्वच्छन्दं धावति । नदीनां प्रवाहेषु धावति । पर्वतानां शिखरेषु धावति । समुद्रस्य तरङ्गेषु धावति । मरुभूमेः सिकतासु अपि धावति । सः अविश्रान्तं धावति । सः निर्बाधं धावति । सः वृक्षात् वृक्षं धावति । सः वृक्षाणां समीपं गत्वा सविनयं पृच्छति – 'कच्चित् तपो वर्धते ?' ध्यानस्थाः मुनयः इव स्थिताः वृक्षाः अपि मस्तकं दोलयित्वा उत्तरं सूचयन्ति – 'अवश्यम् अवश्यम् !'

## विश्वासघातः

**– जातककथा**

ब्रह्मदत्तः यदा काशीराज्यं पालयन् आसीत् तदा बोधिसत्त्वः पण्डितामात्यरूपेण जन्म प्राप्तवान् आसीत्।

कदाचित् काशीराजः ब्रह्मदत्तः पुत्रविषये कुपितः सन् तं देशात् निष्कासितवान्। राजकुमारः पत्न्या सह इतस्ततः अटन् बहूनि कष्टानि अनुभूतवान्। वासार्थं गृहम् उदरपूरणाय भोजनं वा न आसीत् चेदपि तस्य साध्वी पत्नी विना प्रतिवचनं सर्वाणि कष्टानि शान्त्या सोढवती।

केषाञ्चित् वर्षाणाम् अनन्तरं ब्रह्मदत्तस्य मरणं जातम्। पितुः मरणस्य वार्त्तां श्रुत्वा राजकुमारः नितरां सन्तुष्टः। काशीं गत्वा मया अचिरात् एव सिंहासने उपवेष्टव्यम् इति चिन्तयन् सः वेगेन प्रस्थितवान्।

तस्य पत्नी वेगेन गन्तुं न शक्नोति स्म। किन्तु राजकुमारः एतत् न अवगतवान् एव। तत्र नेत्रयोः पुरतः सिंहासनम् एकम् एव नृत्यति स्म। अतः विश्रान्तिः आहारः इत्यादयः पत्न्या प्राप्ताः वा न वा इत्यपि अचिन्तयन् सः वेगेन अग्रे अगच्छत्।

महती सिंहासनप्राप्त्याकाङ्क्षा अस्ति चेदपि विश्रान्तिम् आहारं च विना बहुदूरं गन्तुं न शक्यते खलु? बुभुक्षा श्रान्तिः च राजकुमारम् अपि अबाधत। महता कष्टेन तौ कञ्चित् ग्रामं प्राप्तवन्तौ।

तत्र केचन ग्रामीणाः तयोः दुरवस्थां दृष्ट्वा उक्तवन्तः – "महाशय! भवन्तौ बुभुक्षया पीड्यमानौ सन्तौ एव प्रयाणं कुरुतः इति भाति। वयं पाथेयं सज्जीकृत्य दास्यामः। कृपया नीयताम्" इति।

एतत् अङ्गीकुर्वन् राजकुमारः पत्नीं कुत्रचित् उपवेश्य आहारस्य आनयनाय तान् ग्रामीणान् अनुसृतवान्। ते पर्णैः आहारबन्धं सज्जीकृत्य तस्मै दत्तवन्तः।

आहारबन्धं स्वीकृत्य प्रत्यागच्छन् राजकुमारः अचिन्तयत् – 'एतैः दीयमानः आहारः उभाभ्याम् अपि यदि सेव्येत तर्हि अचिरात् एव पुनरपि बुभुक्षा बाधेत। पुनः आहारः कदा प्राप्येत इति न ज्ञायते। इतोऽपि दूरप्रयाणं तु करणीयम् अस्ति। मम प्रयाणे एषा पत्नी विघ्नायते। तया काशी न प्राप्येत चेदपि न हानिः। मया तु काशी प्राप्तव्या एव। अतः एषः समग्रः आहारः मया एव सेव्येत चेत् वरं स्यात्' इति।

एवं विचिन्त्य सः पत्न्याः समीपं गत्वा अवदत् – "भवती अग्रे गच्छतु। अहं कालकृत्यानि समाप्य अचिरात् एव भवतीम् अनुसरिष्यामि" इति।

तस्य आदेशं पालयन्ती पत्नी ततः प्रस्थितवती। अनन्तरं राजकुमारः समग्रम् आहारं खादित्वा पर्णबन्धं यथापूर्वं बद्ध्वा वेगेन पदानि स्थापयन् पत्न्याः समीपं गतवान्।

पत्नी आशापूर्णया दृष्ट्या यदा आहारबन्धं दृष्टवती तदा राजकुमारः कोपम् अभिनयन् – "अहो, एतेषां ग्रामीणानां धूर्तता! ते रिक्तपत्रबन्धं दत्तवन्तः सन्ति, पश्यतु" इति वदन् रिक्तपत्रबन्धम् उद्घाट्य दर्शितवान्।

पत्नी तस्य वञ्चनापूर्णं व्यवहारं यद्यपि ज्ञातवती, तथापि किमपि अजानती इव मौनेन स्थितवती। पुनः द्वित्राणां दिनानां यात्रायाः अनन्तरं काशी प्राप्ता ताभ्याम्।

राजकुमारः यथाशास्त्रं स्वस्य पट्टाभिषेकं कारयित्वा राजपदवीम् अलङ्कृतवान्। भोगव्यवहारे मग्नः सः

पत्न्याः उपस्थितिम् एव विस्मृतवान्। दुःखेषु या सहभागिनी आसीत् तस्यै सुखे अपि सहभागः दातव्यः इत्यंशः तेन न स्मृतः एव। पत्न्या राजयोग्यः आहारः प्राप्यमाणः अस्ति किम्? तया राजोचितानि वस्त्राणि ध्रियमाणानि सन्ति किम्? इत्यादिकं तेन न चिन्तितम् एव। अतः प्रासादे वसन्त्याः अपि तत्पत्न्याः चिन्ता तु न अपगता।

राज्ञः आस्थाने स्थितः पण्डितामात्यः राज्ञ्याः एतां चिन्ताम् अल्पे एव काले लक्षितवान्। अतः कदाचित् सः तया मेलितुं गतः। राज्ञी तं यथोचितं स्वागतीकृत्य आसनादिदानेन सत्कृतवती।

पण्डितामात्यरूपी बोधिसत्त्वः अवदत् – "महाराज्ञि! कष्टानि अपगतानि इत्यतः राजा मह्यं विविधानि उपायनानि दत्तवान्। किन्तु भवत्या तु अद्यावधि किमपि न दत्तम्" इति।

"महानुभाव! अहं नाममात्रेण राज्ञी अस्मि अत्र। वस्तुतः तु अत्रत्यायाः दास्याः मम च न कोऽपि भेदः । कष्टे यथा, तथैव राज्ञः सुखभोगादिषु या सहभागं न प्राप्नोति सा राज्ञी कथं भवेत्?" इति वदन्ती अश्रूणि स्रावयन्ती राज्ञी काशीं प्रति आगमनसमये तेन कृतं दुर्व्यवहारं श्रावयित्वा पुनः अवदत् – "इदानीम् अपि मम पतिः मयि अवधानवान् नास्ति। मम आहारविषये, वस्त्रविषये, स्थानविषये वा न चिन्तयति एव सः" इति।

तां सान्त्वयित्वा बोधिसत्त्वः अवदत् "महाराज्ञि! अलं चिन्तया। वस्तुस्थितिं भवत्याः मुखात् ज्ञातुम् एव मया अत्र आगतम्। श्वः पूर्णायां सभायाम् अहं भवतीम् एतान् एव प्रश्नान् प्रक्ष्यामि। भवती निर्भयम् उत्तरं ददातु। ततः भवत्याः कष्टानि अपगतानि भविष्यन्ति" इति।

अनन्तरदिने राज्ञी यदा राजसभाम् आगता तदा बोधिसत्त्वः अवदत् – "राज्ञीपदं प्राप्तवती भवती सेवकानां विषये न चिन्तयति एव। एतत् किमर्थम्?" इति।

तदा राज्ञी सर्वं विवृतवती सभायाम्। पत्न्याः भागः अपि खादितः इत्येषः अंशः सर्वैः ज्ञातः इत्यतः राजा नितराम् अपमानं प्राप्तवान्।

राज्ञ्याः कथनं श्रुत्वा बोधिसत्त्वः अवदत् – "महाराज्ञि! येन पत्न्याः सुखदुःखादिकं न विचार्यते तेन सह भवत्या स्थातव्यं नास्ति। श्लोकः कश्चन एवं श्रूयते –

**त्यजेन्नरं तं परिहीणवन्तं न चादरः स्यान्न हि भक्तिरस्मिन्।**
**खगो द्रुमं क्षीणफलं विहाय समेति चान्यं विपुलो हि लोकः॥** इति।

अतः यः पत्न्याम् आदरवान् न, तस्मिन् प्रीतिः दर्शनीया नास्ति। पक्षी अपि फलहीनं वृक्षं परित्यजति। लोकः विशालः अस्ति। अतः आश्रयः तु कुत्रचित् प्राप्येत एव" इति।

एतानि वचनानि श्रुत्वा पश्चात्तापेन दग्धः राजा सिंहासनात् अवतीर्य बोधिसत्त्वस्य पादौ गृहीत्वा – "पण्डितामात्यवर्य! मम अपराधः कृपया क्षन्तव्यः। यत् प्रवृत्तं तद्विषये नितरां खिन्नोऽस्मि अहम्। इतःपरं पत्न्याः विषये धर्म्यं व्यवहारं करिष्यामि" इति।

तस्मात् दिनात् राज्ञः व्यवहारे पूर्णं परिवर्तनं जातम्। पत्नीम् आदरेण पश्यन् सः सुखेन जीवितवान्।

## प्रतिमानाटकम् ( ग्रन्थपरिचयः )

व्योम शाहः

**अनुवर्तते**

महाकविभासप्रणीते प्रतिमानाटके एतावताऽस्माभिः दृष्टं यत् – रामः लक्ष्मणः सीता च वनं प्रति गच्छन्ति। द्वितीयेऽङ्के रामलक्ष्मणवैदेहीनां वनगमनेन दशरथस्य चित्तशून्यता वर्णिता पितॄणां स्मरणपूर्वकं च तस्य अवसानम्। तृतीयेऽङ्के भरतस्य अयोध्यां प्रत्यागमनं, प्रतिमागृहगमनं दशरथप्रतिमादर्शनेन मूर्च्छनं च। रामादीनां वनगमनविषये देवकुलिकः भरताय कथयति। मातृभिस्सह मेलनानन्तरं भरतः वनं गच्छति तत्र च समेषां मेलनं भवति। अनिच्छन् अपि भरतः अग्रजस्य आज्ञाम् उररीकृत्य तदीयपादरक्षे गृहीत्वा अयोध्यां गच्छति। पञ्चमाङ्के तावत् रावणेन कृतं सीतायाः हरणं वर्णितम्।

गच्छन् च जनस्थाननिवासिनः प्रति उद्घोषयति –

**“बलादेष दशग्रीवः सीतामादाय गच्छति। क्षात्रधर्मे यदि स्निग्धः कुर्याद् रामः पराक्रमम्॥”**

अनेन प्रसङ्गेन पञ्चमाङ्कस्य समाप्तिः भवति। षष्ठस्याङ्कस्य शुद्धविष्कम्भके वृद्धतापसयोः संवादरूपेण जटायुषः पराक्रमस्य, सीतां परित्रातुं तस्य प्रयत्नस्य, रावणेन कृतेन असिप्रहारेण तस्य भूमौ पतनस्य वर्णनं कृतं वर्तते। ततः अग्रेतनः प्रसङ्गः अयोध्यायाः राजसदसः वर्तते। अत्र कञ्चुकीयः प्रतीहारद्वारा सुमन्त्रस्य जनस्थानात् आगमनं भरताय निवेदयति। राजा भरतः सुमन्त्रं प्रवेशयितुम् आज्ञापयति। सुमन्त्रः तत्र प्रविशन् शोकाकूलः वर्तमानः वदति –

**नरपतिनिधनं मयाऽनुभूतं नृपतिसुतव्यसनं मयैव दृष्टम्।**
**श्रुत इह स च मैथिलीप्रणाशो गुण इव बह्वपराद्धमायुषा मे॥**

भ्रातृविषये जिज्ञासितः भरतः सुमन्त्रं रामदर्शनस्य विषये पृच्छति किन्तु शोकाकलितहृदयः सुमन्त्रः मौनमेव तिष्ठति। भरतः पुनरपि तं पृच्छति। सुमन्त्रः कथयति यत् रामादयः किष्किन्धां प्रति गताः।

सुमन्त्रः कथयति यत् ज्येष्ठभ्रात्रा रामेण तेषु अपि उपकारः कृतः। सुग्रीवप्रसङ्गं च श्लोकमात्रेण वर्णयति –

**सुग्रीवो भ्रंशितो राज्याद् भ्रात्रा ज्येष्ठेन वालिना। हृतदारो वसन् शैले तुल्यदुःखेन मोक्षितः॥**

तुल्यदुःखं कथं तयोः ? इति भरतेन पृष्टे सुमन्त्रः कथयति–

**“वैरं मुनिजनस्याऽर्थे रक्षसा महता कृतम्। सीता मायामुपाश्रित्य रावणेन ततो हृता॥”**

ततः ससुमन्त्रो भरतः अन्तःपुरं गच्छति प्रतीहारीं च “या मां राजानमिच्छति” इतिवचसा कैकेयीम् आह्वातुम् आदिशति। भरतः तस्यै सीतायाः हरणविषये कथयति। सः कथयति –

**“हन्त भोः। सत्त्वयुक्तानाम् इक्ष्वाकूणां मनस्विनाम्। वधूप्रधर्षणं प्राप्तं प्राप्याऽत्र भवतीं वधूम्॥”**

कैकेयी प्रतिवदति यद् एतत् सर्वं महाराजस्य शापस्य वशेन जातम्। सुमन्त्रः पूर्वतनं प्रसङ्गं कथयति यत् – मृगयार्थं गतः राजा दशरथः वनगजसदृशं कस्यचिद् ऋषिपुत्रस्य जलग्रहणध्वनिम् आकर्ण्य तं प्रति शरं क्षिप्तवान्। तदा सः तेन मुनिना शप्तः –

**“तेनोक्तं रुदिनस्याऽन्ते मुनिना सत्यभाषिणा। यथाऽहं भोस्त्वमप्येवं पुत्रशोकाद् विपत्स्यसे॥”**

भरतः कथयति यद् यदि पुत्रप्रवासः एव इष्टः आसीत् चेत् किमर्थं सः (भरतः) अरण्यं न प्रेषितः। कैकेयी कथयति यत् सः पूर्वतः एव मातुलगृहे आसीत्। चतुर्दशवर्षविषये पृष्टे सा उक्तवती यत् चतुर्दशदिनानि इति वक्तुकामया तया पर्याकुलितहृदयया वर्षाणि इत्युदितम्। भरतः ज्येष्ठस्य साहाय्यार्थम् अखिलं राजमण्डलं नियोजयति।

सप्तमाङ्कस्य मिश्रविष्कम्भके तापस–नन्दिलकयोः संवादेन इदं ज्ञाप्यते यत् रामरावणयोः युद्धं सम्पन्नम्। राघवः रावणं नाशयित्वा तत्र विभीषणम् अभिषिच्य प्रत्यागतः विष्कम्भकस्यान्ते तस्य विमानाद् अवतरणं भवति। सीता–रामौ तत्र जनस्थानस्थिते आश्रमे भ्रमन्तौ विविधानि स्थानानि पश्यन्तौ पूर्वाणि दिनानि स्मरतः। तदा लक्ष्मणः प्रविश्य

विज्ञापयति यत् मातृभिः सह भरतः तत्र जनस्थानं प्राप्तवान्। सर्वे प्रविशन्ति। परस्परम् अभिवादनानि भवन्ति। भ्रातृणां मिथःआलिङ्गनं भवति। ततः वसिष्ठवामदेवाभ्यां सह शत्रुघ्नः प्रविशति। सः अभिदधाति यत् मुनिभिः आहृतेन जलेन प्रथमम् अभिषिक्तं कृत्वा तं द्रष्टुम् इच्छन्ति ऋषयः। मातरः तम् अभिनन्दन्ति।

ततः नेपथ्यतः ध्वनिः श्रूयते – **हत्वा रिपुप्रभवमप्रतिमं तमौघं सूर्योऽन्धकारमिव शौर्यमयैर्मयूखैः।**
**सीतामवाप्य सकलाशुभवर्जनीयां रामो महीं नयति सर्वजनाभिरामः॥**

रामः गगने विलोक्य तातं प्रति कथयति– **स्वर्गेऽपि तुष्टिमुपगच्छ विमुञ्च दैन्यं कर्म त्वयाऽभिलषितं मयि यत् तदेतत्।**
**राजा किलाऽस्मि भुवि सत्कृतभारवाही धर्मेण लोकपरिरक्षणमभ्युपेतम्॥**

सर्वे हृष्टाः। अङ्कस्य अन्ते रामलक्ष्मणयोः संवादः श्लोकेन भवति –

**रामः –''अद्यैव यास्यामि पुरीमयोध्यां सम्बन्धिमित्रैरनुगम्यमानः।''**

**लक्ष्मणः –''अद्यैव पश्यन्तु च नागरास्त्वां चन्द्रं सनक्षत्रमिवोदयस्थम्॥**

नाटकस्य समाप्तिः भरतवाक्येन भवति –

**यथा रामश्च जानक्या बन्धुभिश्च समागतः।तथा लक्ष्म्या समायुक्तो राजा भूमिं प्रशास्तु नः॥**

मुख्यस्रोतसः कृतानि परिवर्तनानि – रामायणस्य मुख्यकथावस्तुनः भासेन बहूनि परिवर्तनानि कृतानि मौलिकतत्त्वानि च स्थापितानि। यथा वल्कलधारणप्रसङ्गः मौलिकः भासेन स्थापितः। तथैव प्रतिमागृहम् अपि मौलिकं वस्तु। रामेण मेलितुं सुमन्त्रस्य पुनः जनस्थानगमनम्।

अन्तःपुरसत्कः कैकेयीप्रसङ्गः। ''चतुर्दश दिनानि'' इत्युक्तिरपि भासेन कैकेय्या पात्रस्य उदात्तीकरणाय स्थापिता। भरतेन रावणस्य वधार्थं राजमण्डलनियोजनम्। काञ्चनमृगग्रहणकाले लक्ष्मणस्य अनुपस्थितिः।

इत्यादीनि भूरिशः परिवर्तनानि कृतानि मौलिकतत्त्वानि च स्थापितानि।

**(समाप्तम्)**

## मासवार्त्ताः

### सम्पन्नः संस्कृतग्रीष्मवर्गः






मईमासस्य १३ दिनाङ्कतः २६ दिनाङ्कपर्यन्तम् एकलव्य–संस्कृत–एकेडेमीसंस्थाने संस्कृतग्रीष्मशिबिरस्य आयोजनम् अभवत्। शिबिरेऽस्मिन् Sr.kg. तः ८ कक्ष्यायाः छात्राणां कृते बालसंस्कृतवर्गाः, दशमकक्ष्यायाः छात्राणां कृते संस्कृतव्याकरणवर्गाः च आयोजिताः। अत्र उल्लेखनीयं यत् ज्येष्ठानां कृते बालनां कृते च संस्कृतभाषाशिक्षणस्य online वर्गाः अपि आयोजिताः आसन्। डॉ. मिहिरः उपाध्यायः, श्रीश्यामः पटेलः, श्रीमती सङ्गीता मिस्त्री, श्रीपारुलः व्यासः च शिक्षकत्वेन छात्रेभ्यः मार्गदर्शनं प्रायच्छन्। संस्कृतस्य अध्ययनेन छात्राः सन्तुष्टाः आसन्।

## कृपया हसन्तु

**अतिथि: - (गृहस्थं प्रति) अस्तु गच्छामि तावत् ।**

**गृहस्थ: - चायं पित्वा गच्छतु भो: !**

**अतिथि: - आम्, अहं भवन्तं तदेव स्मारयितुम् इच्छामि स्म ।**

★ ★ ★ ★ ★

**युवती - (आपणिकं प्रति) भो:, एतस्य उचितं मूल्यं स्वीकरोतु । अहं प्रतिदिनम् इत: एव सर्वं क्रीणामि ।**

**आपणिक: - भो: महोदये ! किमर्थम् असत्यं वदति भवती ? ईश्वरात् बिभेतु । ह्य: एव एष: आपण: उद्घाटित: मया ।**

★ ★ ★ ★ ★

**एकस्मिन् दिने रमणनमनयो: मध्ये कलह: जात: ।**

**रमण: - (नमनम् उद्दिश्य) गच्छ... गच्छ... । त्वादृशान् दश प्राप्स्यामि अहम् ।**

**नमन: - (हसन्) इतोऽपि मादृशम् एव इच्छति ?**

## सुभाषितम्

**- संस्कृतविकिपीडियाजालस्थानात्**

**महता पुण्यमूल्येन क्रीयते कायनौस्त्वया ।**
**गन्तुं दु:खोदधे: पारं तर यावन्न भिद्यते ।**

**तात्पर्यम्** - बहूनां जन्मनामन्ते, महत्पुण्यसञ्चयनान्तरं जीव: मनुष्यदेहं प्राप्नोति । मनुष्यदेहेनैव मोक्षचिन्तनं तदनु प्रयत्नमपि कर्तुं जीव: पारयति । अत: यावत् पर्यन्तम् इदं शरीरं न नश्यति, तावत् संसारसागर: तरणीय: ।

**मातृवत् परदारेषु परद्रव्येषु लोष्टवत् ।**
**आत्मवत् सर्वभूतेषु य: पश्यति स: पण्डित: ।।**

**तात्पर्यम्** - अन्येषां भार्या मातृसमाना, अन्येषां धनं मृत्समानं, सर्वे अपि जीविन: आत्मसमाना: इति भावयन् य: आचरति स: वस्तुत: ज्ञानी ।

**मितं भुङ्क्ते संविभज्याश्रितेभ्य: मितं स्वपित्यमितं कर्म कृत्वा ।**
**ददात्यमित्रेष्वपि याचित: सन् तमात्मवन्तं प्रजहत्यनर्था: ।**

**तात्पर्यम्** - आश्रितेभ्य: सर्वेभ्य: दत्त्वा य: मितम् आहारं सेवेत, अधिकं कार्यं कृत्वापि य: अल्पां निद्रां कुर्यात्, शत्रु: यदि याचेत तथापि आनन्देन दद्यात्, तादृशस्य धीरस्य जीवने अनर्था: न सम्भवन्ति एव ।

# ज्ञानसरित्

श्यामः पटेलः

**तापमानस्य परीक्षकौ**




कस्यचित् स्थानस्य तापमानम् अभिलेखितुं ''फेरनहीट-डिग्री'' अथवा ''सेल्सियस्-डिग्री'' इत्यनयोः उपयोगः भवति। किन्तु अनयोः अभिलेखने भेदः वर्तते। ख्रिस्ताब्दस्य १७१४ तमे वर्षे वैज्ञानिकः ''डेनियल फेरनहीट'' महोदयः तापमानं परीक्षितुं ''थर्मोमीटर'' यन्त्रस्य अन्वेषणं कृतवान्। अनेकेषु द्रवपदार्थेषु उष्णतायाः परिणामान् अभिलिख्य अन्ततो गत्वा पारदधातोः एव उपयोगः थर्मोमीटरयन्त्राय सुनिश्चितः कृतः। पारदः द्रवमयः धातुः अस्ति। जलं यस्मिन् तापमाने हिमं भवति तत् तापमानं ३२ डिग्रीमितं निश्चितम्। तथैव यस्मिन् तापमाने जलम् ऊष्णीभवति तत् २१२ डिग्रीमितं निश्चितं कृत्वा थर्मोमीटरयन्त्रस्य उपरि क्रमशः ३२ तः २१२ पर्यन्तं अङ्कनम् अभवत्। एतदेव ''फेरनहीट-डिग्री'' उच्यते।

तदनन्तरं ख्रिस्ताब्दस्य १७८९तमे वर्षे स्वीडनदेशस्य वैज्ञानिकः ''एन्डर- सेल्सियस्'' महोदयः मेट्रिक-व्यवस्थानुगुणं थर्मोमीटरयन्त्रस्य रचनां कृतवान्। यतो हि अत्र शून्यतः आरभ्य शतं पर्यन्तं मात्राङ्कनं कृतम् आसीत्। येन सर्वेषां कृते सौकर्यम् अभवत्। शून्यम् अर्थात् जलं यस्मिन् तापमाने हिमं भवति। शतम् अर्थात् जलं यस्मिन् तापमाने ऊष्णीभवति। ''एन्डर-सेल्सियस्'' महोदयेन एतस्य 'सेन्टिग्रेड' इति नामकरणं कृतम् आसीत् यत् सम्प्रति ''सेल्सियस्-डिग्री'' नाम्नाऽपि प्रसिद्धम् अस्ति।

पारद – mercury

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **क्षीरम्** | दूध | milk |
| **कबन्धम्** | जल | water |
| **विकृतम्** | परिवर्तित | changed |
| **अभ्यान्तः** | रोगी | diseased |
| **भैषज्यम्** | औषध | medicine |
| **समस्तः** | सम्पूर्ण | complete |
| **पेशलः** | चतुर | clever |
| **प्रणिधिः** | गुप्तचर | spy |
| **लालसा** | उत्कण्ठा | desire |
| **अहर्पतिः** | सूर्य | sun |
| **आम्रः** | आम का वृक्ष | mango tree |
| **आम्रम्** | आम्र का फल | mango |
| **भूषा** | आभूषण | ornament |
| **कलेवरम्** | शरीर | body |
| **ज्ञातिः** | पैतृक संबंध | paternal relation |

## किं भवन्तः जानन्ति ?

**१ ) स्वामिदयानन्दस्य बाल्यकालस्य नाम किम् आसीत् ?**

(क) कृपाशङ्करः (ख) गौरीशङ्करः (ग) मूलशङ्करः (घ) जयशङ्करः

**२ ) स्वामिविवेकानन्दस्य बाल्यकालस्य नाम किम् आसीत् ?**

(क) भूपेन्द्रः (ख) नरेन्द्रः (ग) देवेन्द्रः (घ) माधवः

**३ ) एतासु का कृष्णस्य परमभक्ता आसीत् ?**

(क) अहिल्याबाई (ख) मीराबाई (ग) जोधाबाई (घ) लक्ष्मीबाई

**४ ) एतेषु कः स्वस्य क्रोधकारणात् विख्यातः आसीत् ?**

(क) अत्रिः (ख) भरद्वाजः (ग) विश्वामित्रः (घ) दुर्वासा

**५ ) एतेषु कः यज्ञरक्षायै रामलक्ष्मणौ दशरथात् याचितवान् आसीत् ?**

(क) वसिष्ठः (ख) विश्वामित्रः (ग) वाल्मीकिः (घ) अत्रिः

**६ ) एतेषु कः 'मरा-मरा' इति जपित्वा ब्रह्मज्ञानं प्राप्तवान् आसीत् ?**

(क) याज्ञवल्क्यः (ख) वाल्मीकिः (ग) नारदः (घ) वसिष्ठः

**७ ) एतेषु कस्य हस्ते सर्वदा वीणा भवति स्म ?**

(क) धौम्यस्य (ख) अत्रेः (ग) नारदस्य (घ) भरद्वाजस्य

उत्तराणि – (१) ग (२) ख (३) ख (४) घ (५) ख (६) ख (७) ग

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
जयतु संस्कृतं जयतु भारतम्

**Online / Offline**

**Admission Open**

## संस्कृतभाषाशिक्षणम्

### First Level

**Date :** 01/07/24 to 27/07/24
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

### Third Level

**Date :** 01/07/24 to 27/07/24
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

**Admission Open 2024-25**

**Value Education Through Sanskrit**

## बालसंस्कृतवर्गः

**(Class SKg to 8)**

**Online / Offline**

**Date :** 9/6/24 to 23/3/25
**Day :** Sunday
**Time :** 11:00am to 12:30pm (IST)
**Fees :** 7500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

संस्कृत-
**साम्प्रतम्**

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

**धन्यवादः...**

संस्कृतसाम्प्रतं पत्रिका अष्टादशवर्षेभ्यः प्रतिमासं संस्कृताभिमानिनां सेवायां प्रकाश्यते । संस्कृताभिमानिनां भवतां सहयोगेन सरस्वतीमातुः कृपया च पत्रिकायाः यात्रा नवदशे वर्षे आरभ्यते । एतस्मिन् प्रसङ्गे वयं ग्राहकानां सहयोगिनां च ऋणं स्वीकुर्मः धन्यवादाश्च व्याहरामः ।

**सम्पादकः**

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006